7. सुस्पष्टं व्याख्यानं कार्यम् -

स्वरश्चैव तु हस्तश्च द्वावेतौ युगपद् भवेत्।
हस्तभ्रष्टःस्वरभ्रष्टो न वेदः फलमश्नुते।।
प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ।
प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति।।
विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् ।
व्याकुलं तालुहीनं च पाठदोषाः प्रकीर्तिनाः।।

**चतुर्थो - वर्गः**

8. याज्ञवल्क्यशिक्षायां प्रोक्तान् वेदपाठकगुणान् समुल्लिख्य तत्रप्रदृष्टानिं निदर्शनानि अपि प्रदर्शयत।

9. अधमाः वेद पाठकाः के सन्ति? सुविशदं समीक्ष्यताम्



A (Printed Pages 4)

Roll No. ______________

# AS-2145

## M.A. (Semester-IV) Examination, 2015

## SANSKRIT

## Paper - III

### वर्ग क-वेदः

### (गृह्यसूत्रं शिक्षा च)

*Time Allowed : Three Hours ] [ Maximum Marks : 100*

**निर्देश :** **पञ्च** प्रश्नाः समाधेयाः। प्रथमः प्रश्नोऽनिवार्यः। प्रतिवर्गमेकैस्य प्रश्नस्योत्तरं प्रदेयमिति।

1. अधोलिखितानां संक्षिप्तोत्तराणि लेख्यानि

(क) चूडाकरणं कदा क्रियते?

(ख) 'यथामङ्गलं वा सर्वेषाम्' - इति विधिवाक्यं किन्निर्दिशति?

(ग) समिदाधानस्य किन्तात्पर्यम्?

(घ) भिक्षाचरणसमये ब्राह्मणवटुः कथं सम्बोधनं कुर्यात्?

(ङ) शिक्षाग्रन्थेषु कस्य विषयस्य शिक्षणं वर्तते?

## प्रथमो - वर्गः

2. अधोङ्कितयोर्व्याख्यानं विधेयम् -

(क) प्रदक्षिणमग्निं परीदयोपविशति। अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्तेऽथैनं संशास्ति। ब्रह्मचार्यस्यपोशान कर्म कुरू मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोशानेति। अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ् मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय।

(ख) वेदं समाप्य स्नायात्। ब्रह्मचर्यं वार्ऽष्टाचत्वारिंशकम्। द्वादशकेऽप्येके। गुरूणाऽनुज्ञातः। विधिर्विधेयस्तर्कश्च वेदः। षऽङ्गमेके। न कल्पमात्रे। कामं तु याज्ञिकस्य। उपसंगृह्य गुरूं समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशे प्रागग्रेषु पुरस्तात् स्थित्वाऽष्टानामुदकुम्भानाम्।

3. अधोलिखितयोः सुविशदं व्याख्यानं विधेयम्

(क) स्नातस्य यमान् वक्ष्यामः। कामादितरः।
नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत्।
क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेत्।
उदपानावेक्षणवृक्षारोहणफलप्रपतनसन्धि
सर्पणविवृतस्नानविषमलङ्घन शुक्तवदन
संध्यादिव्यप्रेषणभैक्षणानि च न कुर्यात्
न ह वै स्नात्वा भिक्षेत।





(ख) अष्टवर्षं ब्राह्मणमुपनयेद् गर्भाष्टमे वा
एकादशवर्षं राजन्यम्। द्वादशवर्षं वैश्यम्।
यथामङ्गलं वा सर्वेषाम्। ब्राह्मणान् भोज-
येत्तं च पर्युप्तशिरसमलङ्कृतमानयन्ति।
पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति
वाचयति ब्रह्मचार्य सानीति च।

## द्वितीयो - वर्गः

4. पारस्कर गृह्यसूत्रे निरूपितान् विद्यासंस्कारान् समासतो परिचाय्य तेषामद्यापि किं महत्वमिति प्रदर्शयत।

5. स्पष्टीकुरूत -

(क) अथैनं सूर्यमुदीक्षयति तच्चक्षुरिति।

(ख) अथास्य दक्षिणांसमधि हृदयमालभते मम व्रते ते हृदयं दधामीति।

(ग) सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः।

(घ) दृढव्रतो वधत्रः स्यात् सर्वत आत्मानंगोपायेत् सर्वेषां मित्रमिव ।

## तृतीयो - वर्गः

6. सुस्पष्टा व्याख्या विधेया -

प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।
सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत्।।
कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः।
स्वस्थः प्रशान्तो निर्भीको वर्णानुच्चारयेद् बुधः।।
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।
सममुच्चारयेद् वर्णान् हस्तेन च मुरवेन च।।